CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगणेशायनमः॥अथसोमवारान्वितामावास्याव्रतपूजाविधिः॥तत्रप्रातर्मौनस्ना
नंविधायशुक्लपीतांबरंपरिधायकलंमूलकंआस्यएवाश्वत्थवृक्षसमीपंगत्वाचम्यदी
पंप्रज्वाल्याचम्यकुशादीन्यादायॐअद्येत्यमुकगोत्रायाममयावज्जीवसौभाग्यवैधव्य
भर्तृपुत्रभ्रातृजामातृसभ्रातृसकलकुटुंबस्यापुरारोग्यानेविष्णुलोकवासकामनयाय
आमलिनैरुपचारैर्दीपकलशगणेशपूजापूर्वकाश्वत्थविष्णुसोमासोमवारामावास्या
व्रताङ्गोनारायणप्रदक्षिणामहंकरिष्ये॰अर्घ्यस्थापनं॰नमोस्त्वनन्तायेतिदीपंसंपूज्य॰आ
जिघ्रकलशमितिकलशंसंपूज्य॰गणानांत्वेतिगणपतिंपूजयेत्॰अथाश्वत्थपूजा॥अश्व
त्थमुनमुष्वासगोविन्दस्यसदाप्रिया॥अश्वोवंरुरनेपापवृक्षराजनमोस्तुते॥अनेनैवमंत्रेण
चन्दनाद्युपचारैश्चपूजयेत्॰ततोऽश्वत्थमूलेविष्णुपूजा॰अथवाव

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अक्षताःअक्षन्नेमीम॰पुष्पाणि॰मालतीकेतकीजातीतुलसीचंपकानिच॰मयाहृतानि
पुष्पाणिपूजार्थंप्रतिगृह्यतां॥धूपं॰दशांगुगुग्गुलधूपंनानाद्रव्यसमुद्भवं॥आघ्रेयःस
र्वदेवानांधूपोयंप्रतिगृह्यतां॥दीपं॰आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया॰दीयंग
हाणदेवेशत्रैलोक्यतिमिरापहं॥नैवेद्यं॰अन्नंचभक्ष्यंविविधंचतुरसैःषड्भिःसमन्वितं॰म
यानिवेदितंतुभ्यंनैवेद्यंप्रतिगृह्यतां॥पुनराचमनं॰कर्पूरवासितंतोयंगंगायास्तुसमाहृतं॰
आचम्यतांजगन्नाथप्रसादातिहरप्रभो॥ताम्बूलं॰ताम्बूलंपूगसंयुक्तंकर्पूरेणसुवासि
तं॰लवंगैलादिभिर्युक्तंताम्बूलंप्रतिगृह्यतां॰फलं॰इदंफलंमयादेवस्थापितंपुरतस्त
व॰तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥द्रव्यं॰हिरण्यगर्भगर्भस्थं हेमबीजंविभाव
सोः॰अनन्तपुण्यफलदमतःशान्तिंप्रयच्छमे॥अथसोमापूजा॰सोमायेवचनमस्तुभ्यं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नं॰वक्तव्यक्तस्वरूपायसृष्टिस्थित्यन्तकारिणेऽादिमध्यानहीनायविष्णवेनमोनमः॥
आगच्छदेवदेवेशतेजोराशेजगत्पते॥यावद्व्रतंसमाप्येतत्तावत्वंसन्निधोभव॥अथध्यानं॰
शंखचक्रगदापद्मवनमालाविभूषितं॰पीताम्बरधरंदेवंगरुडोपरिसंस्थितं॰अथासनं॰ना
नारत्नसंयुक्तंस्वर्णपद्मोपशोभितं॰स्वच्छसिंहासनंदेवंगृहाणेदंकृपांकुरु॥पाद्यं॰ना
रायणनमस्तेऽस्तुनरकार्णवतारक॰पाद्यंगृहाणदेवेशविष्णुरूपनमोस्तुते॰अर्घ्यं॰तापत्रय
हरंदिव्यपरमानन्दलक्षणं॰तापत्रयविमोक्षायतुभ्यमर्घंकल्पयाम्यहं॥आचमनीयं॰सु
रासुरैर्नमस्कृतपादाब्जनारायणाय॰दद्म्याचमनंतुभ्यमनन्तायनमोस्तुते॰पंचामृत
स्नानं॰दध्यथेनं॰देवोपैर्वन्दितोधेनुःसर्वपापप्रणाशिनी॰तेनक्षीरस्नापितोदेवोनित्यंमेवरदोभव॰
दध्नाकामतोकामतोवापियन्मयाऽदुष्कृतंकृतं॰तत्सर्वंविलयंयान्तिदधिस्नानेनकेशव॰

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इतिदत्त्वादेवीपूर्वदिशेकुंभंसर्वयामलपूजांकृत्वाश्रीस्नापितोदेवमंत्रंमंत्रेवस्नपयेत्
मेरुस्थेघंटारसानानुत्तमंत्वार्घ्यंदेवानांवसुतत्रियं॥तेनत्वांस्नापयितोदेवनिकांतीप्रदोभव॰
११अधुना॰यस्यधारणमात्रेणनष्टंभवतिनष्टंभवतिमृत्युः॥अधुनाश्रीस्नापितोदेवनित्यंशोकहरोभव॰१२श
र्कायमलोकभयत्रस्तःवारणंत्वांगतःप्रभो॰खंडमानेनदेवेशमांकुरुसुखान्वितं॰१३गं
गाजलस्नानं॰गंगादिसर्वतीर्थेभ्यःसमानितंसुखावहं॰तोयमेतत्सुरश्रेष्ठस्नपयेत्रिदशेश्वरं॰१४व
स्त्रंयुगंदिव्यंचंद्रसन्निभंकरद्युतिं॰परिधास्वसुरश्रेष्ठदेवदेवजगत्पते॰१५यज्ञोपवीतंसोवर्णंतुनुग्रंथितंब्रह्मसूत्रंशुभोभनं॰त्रयीमयंब्रह्मणोदत्तंत्रिगुणात्मकमीश्वरं॰१६चंदनंचागरुसमायुक्तंकर्पूरेणसुवासितं॰कुंकुमागरुमिश्रंचंदनं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैधव्यभंजनायेच॥पंचोपचारपूजांमेगृह्णारजकीवरो॥इत्यनेनचंदनपुष्पाक्षतधूपदीपने
वेद्यतांबूलपूगीफलवस्त्रसिंदूरादिभिःहनयेत्॥क्षमावास्यायेनमः॥इतिपंचोपचारैःपूजये
त्॥सोमवारायनमः॥अथाष्टोत्तरशतंत्रदक्षिणा॥एवंपूजाविधिंकृत्वाततोकुर्यात्प्रदक्षिणां॥मौ
क्तिकैःकांचनैरूप्यैर्हीरकैर्मणिभिस्तथा॥कांस्यपात्रैस्ताम्रपात्रैर्भस्मपूर्णैःपृथक्पृथक्॥गृही
त्वाभ्रमणंकुर्यात्रावदष्टोत्तरंशतं॥मंत्रः॥मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे॥अग्रतोरुद्र
रूपायवृक्षराजायतेनमः॥विल्वमंत्रः॥नमस्तेदेवदेवेशनमस्तेगरुडध्वज॥नमस्तेपुंडरीका
क्षनमस्तेत्रिदशप्रिय॥प्रदक्षिणंकरोमेयंगृहाणपरमेश्वर॥यानिकानिचपापानि
जन्मांतरकृतानिच॥तानिसर्वाणिनश्यंतुप्रदक्षिणपदेपदे॥एवंसर्वंसमाप्तीकृत्यनीराजयाम्यहं॥ततोदक्षिणा॰ॐअत्रेह
अमुकगोत्रोयंनामयज्ञीवसौभाग्यवैधव्यभंगपुत्रभ्रातृजामातृसभ्रातिसकलकुटुंबस्यच

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रत्नेश्वरे विल्वलोकवासकामनयाऽथवा सोमवारान्वितामावास्यायां प्रजाष्टोत्तरशतगरणि
णासांगतासिद्धयेऽमोदक्षिणं. विसर्जनं. यान्तु देवगणाः सर्वे पूजामादाय पार्थिव॥ इष्टकाम स
मृद्धयेऽनरागमनाय वै॥ आवाहनन्नजानामि नजानामि विसर्जनं॥ पूजांचैव नजानामि क्षमस्व
परमेश्वर॥ काम्येनवाच्चा॥ इतिभविष्यपुराणे सोमवारान्वितामावास्यायां पूजाविधिः समाप्तः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi